ॐ हरिः ॐ श्री गुरुभ्यो नमः हरिः ॐ

om hariḥ om śrī guru-bhyo namaḥ hariḥ om

ॐ श्री कृष्णपरमात्मने नमः

om śrī kṛṣṇa-para-māt-mane namaḥ

श्रीमद् भगवद् गीता

śrīmad bhaga-vad gītā

अथ पञ्चमोऽध्यायः।

Atha pañ-camo'dhyā-yaḥ ।

संन्यासयोगः

sann-yāsa-yogaḥ

| | |
|---|---|
| नादत्ते कस्यचित्पापं | nā-dat-te kas-ya-cit-pā-paṁ |
| न चैव सुकृतं विभुः। | na cai-va sukṛ-taṁ vi-bhuḥ । |
| अज्ञानेनावृतं ज्ञानं | ajñā-ne-nā-vṛ-taṁ jñā-naṁ |
| तेन मुह्यन्ति जन्तवः॥१५॥ | tena muh-yan-ti- jan-ta-vaḥ ।।15।। |
| ज्ञानेन तु तदज्ञानं | jñā-nena tu tad-ajñā-naṁ |
| येषां नाशितमात्मनः। | ye-ṣāṁ nā-śi-tam-āt-manaḥ । |
| तेषामादित्यवज्ज्ञानं | te-ṣām-ādit-ya-vaj-jñā-naṁ |
| प्रकाशयति तत्परम्॥१६॥ | pra-kā-śa-yati tat-pa-ram ।।16।। |

| | |
|---|---|
| तद्बुद्धयस्तदात्मानः | tad-bud-dha-yas-tad-āt-mā-naḥ |
| तन्निष्ठास्तत्परायणाः । | tan-niṣ-ṭhās-tat-parā-ya-ṇāḥ \| |
| गच्छन्त्यपुनरावृत्तिम् | gac-chan-tya-puna-rā-vṛt-tim\| |
| ज्ञाननिर्धूतकल्मषाः ॥१७ ॥ | jñā-na-nir-dhū-ta-kal-ma-ṣāḥ \|\| 17\|\| |
| | |
| विद्याविनयसम्पन्ने | vid-yā-vinaya-sam-pan-ne |
| ब्राह्मणे गवि हस्तिनि । | brāh-ma-ṇe gavi hastini \| |
| शुनि चैव श्वपाके च | śu-ni caiva śva-pā-ke ca |
| पण्डिताः समदर्शिनः ॥१८ ॥ | paṇ-ḍi-tāḥ sama-dar-śi-naḥ \|\| 18\|\| |
| | |
| इहैव तैर्जितः सर्गः | ihai-va tair-ji-taḥ sar-gaḥ |
| येषां साम्ये स्थितं मनः । | ye-ṣāṁ sām-ye sthi-taṁ manaḥ \| |
| निर्दोषं हि समं ब्रह्म | nirdo-ṣaṁ hi sa-maṁ brah-ma |
| तस्माद् ब्रह्मणि ते स्थिताः ॥१९ ॥ | Tas-mād brah-maṇi te sthi-tāḥ \|\| 19\|\| |
| | |
| न प्रहृष्येत्प्रियं प्राप्य | na pra-hṛṣ-yet-pri-yaṁ prāpya |
| नोद्विजेत्प्राप्य चाप्रियम् । | no-dvi-jet-prāp-ya cā-pri-yam \| |
| स्थिरबुद्धिरसम्मूढः | sthi-ra-bud-dhir-asam-mū-ḍhaḥ |
| ब्रह्मविद् ब्रह्मणि स्थितः ॥२० ॥ | brah-ma-vid brah-maṇi sthitaḥ \|\| 20\|\| |

| | |
|---|---|
| बाह्यस्पर्शेष्वसक्तात्मा | bāh-ya-spar-śeṣ-va-sak-tāt-mā |
| विन्दत्यात्मनि यत्सुखम् । | vin-dat-yāt-mani yat-su-kham \| |
| स ब्रह्मयोगयुक्तात्मा | sa brah-ma-yoga-yuk-tāt-mā |
| सुखमक्षयमश्नुते ॥२१ ॥ | su-kham-ak-ṣa-yam-aś-nu-te \|\|21\|\| |
| ये हि संस्पर्शजा भोगाः | ye hi saṁ-spar-śa-jā bho-gāḥ |
| दुःखयोनय एव ते । | duḥ-kha-yo-naya eva te \| |
| आद्यन्तवन्तः कौन्तेय | ād-yan-ta-van-taḥ kaun-teya |
| न तेषु रमते बुधः ॥२२ ॥ | na te-ṣu rama-te bu-dhaḥ \|\|22\|\| |
| शक्नोतीहैव यः सोढुम् | śak-no-tī-hai-va yaḥ so-ḍhum |
| प्राक्शरीरविमोक्षणात् । | prāk-śa-rī-ra-vi-mok-ṣa-ṇāt \| |
| कामक्रोधोद्भवं वेगम् | kāma-kro-dhod-bha-vaṁ ve-gam |
| स युक्तः स सुखी नरः ॥२३ ॥ | sa yuk-taḥ sa su-khī na-raḥ \|\|23\|\| |
| योऽन्तःसुखोऽन्तरारामः | yo'n-taḥ-su-kho'n-tarā-rā-maḥ |
| तथान्तर्ज्योतिरेव यः । | ta-thān-tar-jyo-ti-re-va yaḥ \| |
| स योगी ब्रह्मनिर्वाणम् | sa yogī brahma-nir-vā-ṇam |
| ब्रह्मभूतोऽधिगच्छति ॥२४ ॥ | brahma-bhū-to'dhi-gac-chati \|\|24\|\| |

| | |
|---|---|
| लभन्ते ब्रह्मनिर्वाणम् | la-bhan-te brahma-nir-vā-ṇam |
| ऋषयः क्षीणकल्मषाः। | ṛṣa-yaḥ kṣī-ṇa-kal-ma-ṣāḥ । |
| छिन्नद्वैधा यतात्मानः | chin-na-dvai-dhā ya-tāt-mā-naḥ |
| सर्वभूतहिते रताः ॥२५॥ | sar-va-bhū-ta-hite ratāḥ ।।25।। |
| | |
| कामक्रोधवियुक्तानां | kā-ma-kro-dha-vi-yuk-tā-nāṁ |
| यतीनां यतचेतसाम्। | yatī-nāṁ yata-ceta-sām । |
| अभितो ब्रह्मनिर्वाणम् | abhi-to brahma-nir-vā-ṇam |
| वर्तते विदितात्मनाम्॥२६॥ | var-ta-te vidi-tāt-ma-nām ।।26।। |
| | |
| स्पर्शान्कृत्वा बहिर्बाह्यान् | spar-śān-kṛt-vā ba-hir-bāh-yān |
| चक्षुश्चैवान्तरे भ्रुवोः। | cak-ṣuś-cai-vān-tare bhru-voḥ । |
| प्राणापानौ समौ कृत्वा | prā-ṇā-pā-nau sa-mau kṛt-vā |
| नासाभ्यन्तरचारिणौ ॥२७॥ | nā-sābh-yan-tara-cāri-ṇau ।।27।। |
| | |
| यतेन्द्रियमनोबुद्धिः | yaten-dri-ya-mano-bud-dhiḥ |
| मुनिर्मोक्षपरायणः। | mu-nir-mok-ṣa-parā-ya-ṇaḥ । |
| विगतेच्छाभयक्रोधः | viga-tec-chā-bha-ya-kro-dhaḥ |
| यः सदा मुक्त एव सः ॥२८॥ | yaḥ sadā muk-ta eva saḥ ।।28।। |

| | |
|---|---|
| भोक्तारं यज्ञतपसाम् | bhok-tā-raṁ yajña-tapa-sām |
| सर्वलोकमहेश्वरम् । | sarva-loka-maheś-va-ram \| |
| सुहृदं सर्वभूतानाम् | su-hṛdaṁ sarva-bhū-tā-nām |
| ज्ञात्वा मां शान्तिमृच्छति ॥२९॥ | jñāt-vā māṁ śān-ti-mṛc-chati \|\|29\|\| |
| | |
| ॐ तत्सत् | oṁ tat-sat |
| इति श्रीमद्भगवद्गीतासु | iti śrīmad-bhaga-vad-gī-tā-su |
| उपनिषत्सु ब्रह्मविद्यायाम् | upa-ni-ṣat-su brahma-vid-yā-yām |
| योगशास्त्रे श्रीकृष्णार्जुनसंवादे | yoga-śās-tre śrī-kṛṣ-ṇār-juna-saṁ-vā-de |
| संन्यासयोगो नाम | sann-yāsa-yogo nāma |
| पञ्चमोऽध्यायः ॥ | Pañca-mo'dhyā-yaḥ \|\| |

ॐ हरिः ॐ श्री गुरुभ्यो नमः हरिः ॐ

oṁ hariḥ oṁ śrī guru-bhyo namaḥ hariḥ oṁ